दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णतृतीया
बैशाख 21 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-191





मई 04, 2026

Website- www.himsanskritam.com Email-himsanskrit@gmail.com



2 **HP PANCHAYAT ELECTION- नामाङ्कनात् पूर्वमेव प्रचारार्थं द्वारं-द्वारं गच्छन्ति भाविनः प्रत्याशिनः**

3 **HP WEATHER UPDATE- प्रदेशस्य अनेकेषु जनपदेषु तीव्रवायुना सह वृष्टिः**

4 **होर्मुज-जलडमरूमध्यस्य नियन्त्रणाय ईरान-संसदः नूतनः प्रस्तावः इजरायल-अमरीका-देशयोः उपरि प्रतिबन्धाः**


## निर्वाचनम्: श्वः पञ्चराज्येषु मतगणना, सज्जता पूर्णताम् अगता



नूतनदेहली। पश्चिमबङ्गाल-असम-तमिळनाडु-केरल-पुदुच्चेरीणां विधानसभा निर्वाचनानाम् मतगणना श्वः प्रातः अष्टवादनात् आरप्स्यते। निर्वाचनायोगेन सुरक्षायाः सुदृढप्रबन्धाः कृताः सन्ति। असमराज्ये पञ्चत्रिंशत् जनपदानां चत्त्वारिंशत् केन्द्रेषु गणना भविष्यति, यत्र एप्रिलमासे ८६ प्रतिशतं मतदानम् अभवत्।

## पश्चिमबङ्गालस्य फाल्टा-क्षेत्रे पुनर्मतदानस्य निर्णयः

कोलकाता। निर्वाचनायोगेन पश्चिमबङ्गालस्य फाल्टा-विधानसभाक्षेत्रस्य २८५ केन्द्रेषु मई-मासस्य २१ दिनाङ्के पुनर्मतदानस्य घोषणा कृता। अप्रैल-मासस्य २९ दिनाङ्के ई.वी.एम. यन्त्रैः सह सङ्केत-भङ्गः तथा मतदान-नियमानाम् उल्लङ्घनं दृष्ट्वा एषः निर्णयः स्वीकृतः।

## दिल्ली-अग्निकाण्डः

### भीषणदुर्घटनायां नवजनानां मृत्युः





नूतनदेहली। दिल्ल्याः विवेक-विहार-क्षेत्रे एकस्मिन् चतुर्तलात्मके भवने भीषण-अग्निकाण्डः जातः, यत्र नवजनाः कालकवलिताः। उपराज्यपालः तरनजीत सिंह-सन्धुः मुख्यमन्त्री रेखा-गुप्ता च शोकं प्रकटयन् मृतानां परिवारेभ्यः संवेदनाः दत्तवन्तौ।

## तैल-निर्यातकेषु ओपेक-देशेषु सहमतिः उत्पादनलक्ष्यं वर्धिष्यते

दुबई। ओपेक प्लस-देशाः जून-मासात् तैलोत्पादनस्य लक्ष्यं प्रतिदिनं १.८८ लक्षं बैरल-परिमाणेन वर्धयितुं सहमताः। भू-राजनैतिक सङ्कटस्य मध्ये एषः निर्णयः वैश्विक-विपण्यं प्रभावयिष्यति।

# अन्तरिक्षक्षेत्रे भारतस्य महतोपलब्धिः- प्रधानमंत्री 'गैलेक्स-आई' दलम् अभिनन्दितवान्



प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् गैलेक्स-आई इत्यस्य मिशन्-दृष्टिः भारतस्य अन्तरिक्षयात्रायां महतोपलब्धिः अस्ति। विश्वस्य प्रथमस्य ऑप्टो-सार इत्यस्य उपग्रहस्य, भारतस्य बृहत्तमस्य निजी-निर्मितस्य उपग्रहस्य च सफलप्रक्षेपणं नवकल्पनाय राष्ट्रनिर्माणाय च यूनाम् उत्साहस्य प्रमाणम् अस्ति इति श्रीमोदिना सामाजिकान्तर्जालीये पटले उक्तम्। तेन गैलेक्स्-आई इत्यस्य संस्थापकेभ्यः, सम्पूर्णदलाय च अभिनन्दितम्।

## किरेन रिजिजू इत्यस्य विपक्षे प्रहारः "संस्थानां मानमर्दनं कुर्वन्ति विपक्षीदलाः"



नूतनदेहली। केन्द्रीयमन्त्री किरेन रिजिजू आरोपितवान् यत् विपक्षीदलाः न्यायपालिका-निर्वाचनायोग-ईवीएम-प्रसारमाध्यमानां च उपरि मिथ्या-आक्षेपं कृत्वा लोकतन्त्रस्य मूल-आत्मनि प्रहारं कुर्वन्ति।

## ईरान-अमरीका सङ्घर्षः

### युद्धविरामाय ईरानस्य चतुर्दश-सूत्रीय योजना

तेहरान/वाशिंगटन। ईरान-सर्वकारेण अमरीकायाः पुरतः युद्ध-समाप्त्यै ३० दिनानां समयसीमायुक्तः प्रस्तावः उपस्थापितः। तथापि अमरीका-राष्ट्रपतिः डोनाल्ड ट्रम्पः अस्य उपरि असन्तोषं प्रकटयन् सैन्य-विकल्पस्य सङ्केतं दत्तवान्।

## ऋतु-विभागस्य चेतावनी: पूर्वोत्तरभारते केरल-तमिलनाडु राज्येषु च प्रचण्डवृष्टेः सम्भावना

नूतनदेहली। भारत-ऋतु-विभागेन केरल, तमिलनाडु, पुदुचेरी, पश्चिमबङ्ग तथा पूर्वोत्तरराज्येषु भारी-वृष्टेः पूर्वानुमानं कृतम्। दिल्ली-हरियाणा-पञ्जाबादिषु अपि मेघगर्जनस्य विद्युत्-स्खलनस्य च सम्भावना वर्तते।

## पुतिन-महोदयस्य विशेषदूतस्य आशङ्का– विश्वम् इतिहासस्य भीषणतम-ऊर्जासङ्कटं प्रति गच्छति



रूसी-प्रत्यक्ष-निवेश-कोषस्य (आरडीआईएफ) मुख्यकार्यकारी अधिकारी, अन्यराष्ट्रैः सह निवेश-आर्थिकसहयोगाय राष्ट्रपति-व्लादिमीर-पुतिनस्य विशेषप्रतिनिधिः किरिल दिमित्रीवः उक्तवान् यत्, विश्वम् इतिहासस्य विशालतमस्य ऊर्जासङ्कटस्य अभिमुखं वर्तते, परं जगतः अस्य आभासः अपि नास्ति। दिमित्रीवः 'एक्स' (पूर्वतनं ट्विटर) इति सामाजिक-माध्यमे टिप्पणीं कुर्वन् अकथयत् यत्, "विश्वम् इतिहासस्य ऊर्जासङ्कटस्य भीषणतमं गर्तं प्रति सुप्तं सन् (अचेतनावस्थायां) गच्छति, अधुना केचन विचारवन्तः जनाः अस्मिन् विषये ध्यानं दातुं प्रारब्धवन्तः।" पूर्वं, अन्तर्राष्ट्रिय-ऊर्जा-सङ्घस्य प्रमुखः फातिह बिरोलः यूरोप-महाद्वीपे डीजल-इन्धनस्य तथा 'जेट'-इन्धनस्य न्यूनतायाः विषये सचेतनां दत्तवान् आसीत्। अन्तर्राष्ट्रिय-वायु-परिवहन-सङ्घस्य महानिदेशकः विलियम वाल्शः अपि अनन्तरं सूचितवान् यत्, जेट-इन्धनस्य न्यूनतायाः कारणात् मई-मासस्य अन्ते यूरोप-देशेषु विमानानां उड्डयनं स्थगितं भवितुं शक्नोति।

## सुभाषितम्

**अणुभ्यश्च महद्भ्यश्च, शास्त्रेभ्यो कुशलो नरः।**
**सर्वतः सारमादद्यात्, पुष्पेभ्यः इव षट्पदः।।**

भावार्थः- विभिन्न शास्त्रों का साधारण अथवा विशेष ज्ञान प्राप्त करने के लिए बुद्धिमान् व्यक्तियों को मधुमक्खियों के समान आचरण करना चाहिए जो चारों ओर घूम कर पुष्पों से उनका सार (पराग और मधु) ही ग्रहण करते हैं।


हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## शिक्षामन्त्री धर्मेन्द्रप्रधानः नीट (यूजी) परीक्षार्थिभ्यः शुभकामनाः प्रदत्तवान्



शिक्षामन्त्री धर्मेन्द्रप्रधानः स्नातक-चिकित्सा-पाठ्यक्रमेषु प्रवेशार्थम् अद्यतन-नीट (NEET) परीक्षायां सम्मिलितेभ्यः छात्रेभ्यः शुभकामनाः विस्तारितवान्। सामाजिक-सञ्जाल-पटले (Social Media) एकेन सन्देशेन तेन उक्तं यत्, "चिकित्सा-क्षेत्रं करुणायाः, सेवायाः, जीवनपर्यन्तं च शिक्षण-प्रतिबद्धतायाः क्षेत्रं वर्तते।"

# स्वास्थ्यविभागस्य स्पष्टीकरणम् खनेरी- नर्सिङ्ग- संस्थाने केवलं छात्राद्वयं क्षयरोग-सङ्क्रमितम्, १९ सङ्ख्यात्मिका वार्ता भ्रामिका

**हिमसंस्कृतवार्ताः- शिमला।** महात्मागान्धी-मेमोरियल- स्वास्थ्यसेवा- संस्थान- खनेरी (रामपुरम्) इत्यस्य 'नर्सिङ्ग-छात्रावासे' क्षयरोग- प्रकरणानि अधिकृत्य केषुचित् जनमाध्यमेषु सामाजिकमाध्यमेषु च भ्रामिका सूचना प्रसारिता वर्तते। अस्मिन् विषये स्वास्थ्यविभागः स्पष्टयति यत् नर्सिङ्ग-छात्रावासे केवलं छात्राद्वयं क्षयरोग-सङ्क्रमितं प्राप्तं ययोः उपचारः समये एव आरब्धः। अनयोः एका छात्रा पूर्णतया स्वस्थीभूता अस्ति, अन्या च नियमित-उपचारे वर्तते। यथा सामाजिकमाध्यमेषु उच्यते यत् १९ छात्राः सङ्क्रमिताः सन्ति, तत् सर्वथा असत्यम् अस्ति। ९.७.२०२५ दिनाङ्के प्रथमा छात्रा सङ्क्रमिता प्राप्ता आसीत्, यस्याः तस्मिन्नेव दिने उपचारः आरब्धः, तस्याः १३ क्लोज-कौण्टैक्ट्स (समीपवर्ति- सम्पर्काः) 'टीपीटी' इति दत्तम्। ततः परं ९.१२.२०२५ दिनाङ्के द्वितीया छात्रा सङ्क्रमिता प्राप्ता, यस्याः अपि तत्कालं उपचारः आरब्धः तथा च तस्याः ०३ क्लोज-कौण्टैक्ट्स जनेभ्यः 'टीपीटी' दत्तम्। अतः १६ छात्राः पूर्वोक्तयोः उभयोः रोगग्रसितयोः छात्रयोः समीपवर्ति-सम्पर्काः सन्ति, अन्या च एका छात्रा कस्यचित् बाह्य-रोगिणः समीपवर्ति- सम्पर्कत्वेन 'टीपीटी' गृह्णाति। भारतसर्वकारस्य मार्गदर्शिकानाम् (Guidelines) अनुसारं क्षयरोगात् रक्षणार्थं एतत् औषधं प्रदीयते येन भविष्ये तासां सङ्क्रमणं न भवेत्। एतासु एमडीआर-टीबी इत्यस्य किमपि प्रकरणं नास्ति।उभाभ्यां रोगग्रसिताभ्यां छात्राभ्यां 'निक्षय-पोषण- योजना' अन्तर्गतं 'डीबीटी' माध्यमेन आर्थिक-साहाय्यं प्रदत्तं, 'निक्षय-मित्रस्य' सहयोगेन पोषण-किट अपि उपलब्धं कारितम्। स्वास्थ्यविभागेन प्रकरणानां परिचये जाते एव तत्कालं चिकित्सा आरब्धा, 'राष्ट्रिय- क्षयरोग- उन्मूलन- कार्यक्रमस्य' मार्गदर्शिकानां पूर्णं पालनं सुनिश्चितं कृतम् अस्ति। एतदतिरिच्य, ६ मार्च २०२६ दिनाङ्के उक्त- नर्सिङ्ग-छात्रावासे क्षयरोगस्य 'एक्टिव- केस- फाइण्डिङ्ग' इत्यर्थं विशेष-शिबिरम् आयोजितं यस्मिन् ८० छात्राणां 'ह्याण्डहेल्ड्' एक्स- रे- यन्त्रेण परीक्षणं क्षयरोग-लक्षणानां परीक्षणं च कृतम्। स्वास्थ्यविभागः सर्वान् नागरिकान् प्रार्थयति यत् किमपि भ्रामकं न श्रृण्वन्तु, केवलं आधिकारिक-प्रमाणिक-सूचनासु एव विश्वासं कुर्वन्तु।

# HP PANCHAYAT ELECTION- नामाङ्कनात् पूर्वमेव प्रचारार्थं द्वारं-द्वारं गच्छन्ति भाविनः प्रत्याशिनः




## > पक्षं सुदृढं कर्तुं मतदातॄणां नाडीपरीक्षणं कुर्वन्ति, हिमाचले प्रथमवारं ३१,१८२ पदेभ्यः जायते निर्वाचनम्

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे भवितव्यस्य पञ्चायत-निर्वाचनस्य स्वरूपम् अधुना पूर्णतया स्पष्टं जातम्। पञ्चायत- निर्वाचने स्वपक्षं सुदृढं कर्तुं राज्यस्य अधिकांशभागेषु ग्रामीणस्तरे अभ्यर्थिनः जनसम्पर्कं प्रारब्धवन्तः। यद्यपि पञ्चायत-निर्वाचनाय समयसारिणी निश्चिता वर्तते, किन्तु नामाङ्कन-प्रक्रियायाः आरम्भात् पूर्वमेव राज्ये बहवः अभ्यर्थिनः स्वसमूहैः सह निर्वाचन-प्रचारार्थं निर्गच्छन्तः सन्ति। अस्मिन् वारे पञ्चायत-निर्वाचनं सम्पूर्णे राज्ये अतीव रोचकं भविष्यति। राज्ये प्रथमवारं ३१,१८२ पदेभ्यः निर्वाचनानि जायन्ते। प्रत्येकस्मिन् पञ्चायते प्रत्येकं जनः पञ्च मतानि दास्यति। अस्मिन् निर्वाचने अभ्यर्थिनां सङ्ख्यायाम् अपि वृद्धिः दृश्यते। सामान्यजनात् आरभ्य 'एचएएस' अधिकारी-स्तरपर्यन्ताः अभ्यर्थिनः अपि अस्मिन् वारे पञ्चायत-निर्वाचने स्वशक्ति-प्रदर्शनाय सज्जाः सन्ति। अतः एषः निर्वाचन-सङ्घर्षः रोचकत्वेन सह कठोरः अपि भविष्यति। अभ्यर्थिनः स्व-परिचयं वर्धयितुं मतदातॄणां मनोभाव- परिचयं ('नाडीपरीक्षणं') कुर्वन्तः सन्ति, स्व- अभ्यर्थितां निश्चितां कर्तुं च दिवारात्रं मतदातारः स्वपक्षे आनेतुं प्रयतन्ते। राज्ये अस्मिन् वारे आहत्य ३,७५८ पञ्चायतेषु निर्वाचनानि भविष्यन्ति। प्रदेशे २१,६७८ वार्ड-सदस्यपदेभ्यः मतदानं भविष्यति। खण्ड- समिति-निर्वाचनस्य विषये तु अस्मिन् वारे १,७६९ आसनेभ्यः निर्वाचनानि भवितव्यानि। जिला- परिषद्- निर्वाचनेषु अस्मिन् वारे २५१ आसनेषु मतदानं भविष्यति। आहत्य अस्मिन् वारे पञ्चायत- निर्वाचनस्य व्याप्तिः पूर्वस्य अपेक्षया विशाला जाता अस्ति, येन स्थानीय-लोकतान्त्रिक- प्रक्रियायां सहभागिता प्रतिनिधित्वं च वर्धिष्यते इति आशा वर्तते।

## त्रिषु चरणेषु निर्वाचनम्-

हिमाचलप्रदेशे पञ्चायत-निर्वाचनं त्रिषु चरणेषु भविष्यति। सम्पूर्णप्रदेशस्य ३,७५४ ग्रामपञ्चायतेषु मतदानं २६ मई, २८ मई तथा ३० मई दिनाङ्केषु भविष्यति। एतदर्थं नामाङ्कन-प्रक्रिया ७ मई दिनाङ्कतः आरप्स्यते। निर्वाचन-प्रक्रियायाः समीपे आगमनेन अभ्यर्थिनां मध्ये सञ्चलनं तीव्रम् अभवत्। अभ्यर्थिभ्यः आवश्यकं यत् ते नामाङ्कनात् पूर्वं स्व-योग्यतायाः नियमानुसारं सम्यक् परीक्षणं कुर्युः।

# चलति बस-याने चालकाय हृदयघातः अभवत्, नूरपुरे मार्गे विपर्यस्तं यानम्, अनेके आहताः



**हिमसंस्कृतवार्ताः- नूरपुरम्।** नूरपुर-समीपे न्याजपुरक्षेत्रे एकस्य निजी- बस- यानस्य (HP 72 D3791) विपर्ययनेन प्रायः षड्विंशतिः (२६) जनाः आहताः अभवन्। सूचनानुसारं रविवासरे प्रातः एकादश (११:००) वादने एकं निजी-बसयानं चम्बातः ऊनां प्रति गच्छन्ती आसीत्। नूरपुरं प्राप्य न्याजपुर-समीपे सहसा बस-चालकाय हृदयघातः अभवत्, येन अनियन्त्रितं भूत्वा यानं मार्गे विपर्यस्तम्। अस्मिन् अन्तराले बस-चालकः संज्ञाहीनः सन् गवाक्षात् बहिः अपतत्। दुर्घटनायाः सूचनां प्राप्य स्थानीयाः जनाः तत्कालं घटनास्थलं प्राप्तवन्तः आहतान् च बहिः निष्कास्य उपचारार्थं नागरिक-चिकित्सालयं नूरपुरम् प्रेषितवन्तः। अस्मिन् काले स्थानीय- विधायकः रणवीरसिंहनिक्का अपि चिकित्सालयं प्राप्तवान्। गम्भीररूपेण आहताः त्रयः यात्रिणः प्राथमिक- उपचारानन्तरं टाण्डा- चिकित्सा-महाविद्यालयं प्रति प्रेषिताः। अन्येषाम् आहतानां उपचारः नूरपुर-चिकित्सालये एव प्रचलति। अस्यां दुर्घटनायां २६ जनाः आहताः, येषु त्रयाणां स्थितिः गम्भीरा अस्ति। अन्येषां स्थितिः स्थिरा इति उच्यते। प्रशासनेन गम्भीररूपेण आहतेभ्यः ५,००० रूप्यकाणाम् अन्येभ्यः आहतेभ्यः २,००० रूप्यकाणां तात्कालिकीसहायता प्रदत्ता।

## मुख्यमन्त्री सुक्खु-महोदयेन दुर्घटनायां दुःखं प्रकटितम्

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सामाजिकमाध्यमे अलिखत् यत्- "न्याजपुर-नूरपुर-समीपे एकस्य निजी-बस- यानस्य दुर्घटनाग्रस्तस्य वार्ता अतीव दुःखदा अस्ति। अस्यां दुर्घटनायां बहवः यात्रिणः आहताः सन्ति, येषु द्वयोः स्थितिः गम्भीरा वर्तते। सर्वे आहताः तत्कालं नागरिक-चिकित्सालये प्रेषिताः सन्ति। ईश्वरात् सर्वेषां शीघ्र- स्वास्थ्य- लाभार्थं प्रार्थनां करोमि। राज्य-सर्वकारः अस्मिन् कठिने समये प्रभावित-परिवारैः सह दृढतया तिष्ठति।"

## भारतं प्रति आगच्छन् 'एमटी-सर्व-शक्तिः' नामकः एलपीजी- टैंकरपोतः होर्मुज-जलडमरूमध्यं सुरक्षितरूपेण पारं कृतवान्।

भारतं प्रति आगच्छन् 'एमटी-सर्व-शक्तिः' नामकः एलपीजी- टैंकरपोतः होर्मुज-जलडमरूमध्यं सुरक्षितरूपेण पारं कृतवान्। अस्मिन् पोते ४६,३१३ मीट्रिक- टनपरिमितः एलपीजी (द्रवीकृतः पेट्रोलियम-वायुः) अस्ति। पोते आहत्य २० चालकदलसदस्याः सन्ति, येषु १८ भारतीयाः अन्तर्भवन्ति। आधिकारिक-स्रोतानुसारम् एषः टैंकरपोतः मईमासस्य त्रयोदश दिनाङ्कपर्यन्तं विशाखापत्तनं प्राप्स्यति इति आशा अस्ति। पत्तन- पोतपरिवहन- जलमार्ग- मन्त्रालयेन पत्रकार-सम्मेलने सूचितं यत् अस्मिन् क्षेत्रे सर्वे भारतीय-नाविकाः सुरक्षिताः सन्ति, भारतीय- ध्वजाङ्कित- पोतैः सह काऽपि अप्रिया घटना न घटिता।

# HP WEATHER UPDATE- प्रदेशस्य अनेकेषु जनपदेषु तीव्रवायुना सह वृष्टिः




**हिमसंस्कृतवार्ताः- शिमला।** ऋतुविज्ञान-विभागस्य सतर्कता-सूचना मध्ये हिमाचलप्रदेशस्य अनेकेषु जनपदेषु रविवासरे महती वृष्टिः अभवत्। अनया वृष्ट्या करकापातेन (ओलावृष्टिः) च यद्यपि जनाः प्रचण्डतापात् मुक्तिं प्राप्तवन्तः, तथापि कृषकाणां फलकृषकाणां च महती हानिः जाता। वृष्टेः कारणात् कृषकाणां गोधूम-सस्यं क्षेत्रेषु सिक्तं जातं, करकापातेन च सेब-फलानां कृषौ सङ्कटः उत्पन्नः। अनेकेषां कृषकाणां गोधूम-सस्यम् अद्यापि क्षेत्रेषु तिष्ठति, यदा तु महती मात्रायां 'पशुखाद्यं' (तूड़ी) मुक्तक्षेत्रेषु पतितं वर्तते। कृषकाः तूड़ी-रक्षणाय 'आवरणं' प्रयुक्तवन्तः आसन्, किन्तु तीव्रवायुना तत् अपसारितं, येन तस्य विकृतस्य सम्भावना वर्धिता।
अपरतः, वृष्ट्या सह आगतेन प्रचण्डवातेन स्थाने स्थाने वृक्षाणां पतनस्य वार्ताः अपि सम्मुखम् आगताः। नाहन-पांवटा-राष्ट्रमार्गे (NH-07) 'बोहलियों' समीपे एकः विशालकायः वृक्षः मार्गे पतितः, येन सार्ध-घण्टां यावत् यातायातं अवरुद्धम् अभवत्। स्थानीयजनानां साहाय्येन वृक्षः अपसारितः, ततः परं लघु-बृहत्-वाहनानां आवागमनं सुचारु जातम्। सौभाग्यवशात् एषः वृक्षः कस्यापि वाहनस्य उपरि न पतितः।तथैव, सोलनस्य 'कथेड' क्षेत्रे ३३ केवी (33 KV) मुख्य-विद्युत्-तन्त्री वृक्षस्य पतनेन विद्युत्-आपूर्तिः स्थगिता, येन जनाः कष्टं अनुभवन्ति। विद्युत्- अभावात् गृहकार्याणि व्यापारिक-गतयः च प्रभाविताः। सूचनां प्राप्य विद्युत्-विभागस्य दलं घटनास्थलं प्राप्तवत्, विद्युत्-पुनर्स्थापन-कार्यं च प्रारब्धम्। अधिकारिणः आशां प्रकटितवन्तः यत् शीघ्रमेव आपूर्तिः पुनः भविष्यति। उल्लेखनीयं यत् ऋतुविज्ञान-विभागेन ३, ४ तथा ५ मई दिनाङ्कानां कृते प्रदेशे अन्धक-प्रवातस्य विद्युत्पातस्य च पीत-सतर्कता प्रसारिता। अस्मिन् अन्तराले बहुषु स्थानेषु गर्जन- तडित्- पातेन सह वृष्टिः तथा ३० तः ५० कि.मी. प्रतिघण्टावेगेन तीव्रवायु-चलनस्य सम्भावना अस्ति। विशेषतः मध्य-उच्च-पर्वतीयक्षेत्रेषु अस्य अधिकः प्रभावः भविष्यति। ६-७ मई दिनाङ्कयोः अपि मन्द-वृष्टिः प्रचलिष्यति, ८ मई दिनाङ्कतः च ऋतुः स्वच्छः भविष्यति।

**सतर्कतायै प्रार्थना-**
ऋतुविज्ञान-विभागेन प्रशासनेन च जनेभ्यः प्रार्थना कृता यत् प्रतिकूल-वातावरणकाले अनावश्यक- यात्रां न कुर्वन्तु, वृक्षेभ्यः दुर्बल-निर्माणेभ्यश्च दूरे तिष्ठन्तु तथा विद्युत्-पातनस्य भयं दृष्ट्वा मुक्ताकाशे न तिष्ठन्तु। प्रदेशे परिवर्तमानस्य वातावरणस्य मध्ये एषा सचेतना जनानां कृते सतर्कतायाः महत्तरः सङ्केतः अस्ति।

# हिमाचल-पर्यटन-ऋतुः-पर्यटनं वेगं प्राप्तवत्, शिमला- धर्मशाला- मनाली नगरेषु

## उपाहारगृहाणि पूर्णानि; कसौली अपि संकुलम्



**हिमसंस्कृतवार्ताः- शिमला।**समतलराज्यानां तापस्य निवारणाय पर्यटकाः हिमाचलस्य पर्यटनस्थलेषु आगन्तुं प्रारभन्त। सप्ताहान्तस्य सङ्ख्या सह शुक्रवासरे बुद्धपूर्णिमा- पर्वणः अवकाशकारणात् पर्यटकानां संख्यायां विशाला वृद्धिः जाता। शिमला-धर्मशाला-मनाली नगराणां उपाहारगृहेषु निवासदरः ६० तः ९० प्रतिशतं यावत् प्राप्तः। अस्मिन् सप्ताहान्ते धर्मशाला- मैक्लोड्गञ्ज- नगरयोः ९० प्रतिशतं निवासदरः अभवत्। शिमलायां शनिवासरे सायङ्कालपर्यन्तं उपाहारगृहेषु निवासः ६० प्रतिशतात् अधिकः सञ्जातः। होटल-व्यवसायिनां मते, अस्मिन् सप्ताहान्ते समीपस्थ-राज्येभ्यः पञ्जाब-हरियाणा- राजस्थान- चण्डीगढ़- दिल्ली इत्यादिभ्यः पर्यटकाः हिमाचलम् आगतवन्तः। शनिवासरे शिमलायाः रिजमैदाने, कुफरी-नारकण्डयोः च विपुला पर्यटकाः रमणीय-ऋतौ भ्रमणस्य आनन्दं गृहीतवन्तः।मनालीनगरे दिनद्वये प्रायः ५,५०० पर्यटकानां वाहनानि समागतानि। बञ्जार-मणिकर्ण-क्षेत्रयोः अपि प्रायः ३,००० वाहनानि आगतानि। कुल्लूमण्डले ७० तः ८० प्रतिशतं प्रकोष्ठाः पूरिताः सन्ति। अपरपक्षे, सप्ताहान्ते सोलन-मण्डलस्य कसौली- चायलक्षेत्रे पर्यटकानां कोलाहलेन गुञ्जितम् अभवत्। स्थितिः एतादृशी अस्ति यत् कसौली-क्षेत्रस्य प्रायः सर्वेषु उपाहारगृहेषु १०० प्रतिशतं निवासः अभवत्, येन पर्यटन-व्यवसायिनां मुखे हर्षः दृश्यते। हिमाचलप्रदेशस्य 'होटल एण्ड रेस्टोरेंट्स फेडरेशन' इत्यस्य अध्यक्षः गजेन्द्र चन्द ठाकुरः अवदत् यत् मैदानी-क्षेत्रेषु ग्रीष्मस्य वृद्ध्या सहैव प्रदेशस्य पर्यटनस्थलेषु पर्यटकानां संख्या वर्धमाना अस्ति। आगामिषु दिनेषु अपि पर्यटकानां संख्यायाम् एतादृशः एव वेगः भविष्यति इति आशा वर्तते।

# पश्चिमबङ्गाल-असम-तमिळनाडु केरल-पुदुच्चेरी- विधानसभा निर्वाचनानाम् मतगणना अद्य प्रातः अष्टवादनात् समारप्स्यते

पश्चिमबङ्गाल-असम-तमिळनाडु केरल-पुदुच्चेरी- विधानसभा निर्वाचनानाम् मतगणना अद्य प्रातः अष्टवादनात् समारप्स्यते । निर्वाचनायोगेन एतदर्थं सर्वाः सज्जताः कृताः। असमस्य षड्विंशत्यधिकैकशतमासनेषु, केरलस्य चत्वारिंशदधिकैकशतं, पुदुचेरी-केन्द्रशासितप्रदेशस्य त्रिंशदासनेषु च एप्रिलमासस्य नवदिनाङ्के मतदानमभवत्। एवमेव तमिलनाडोः चतुस्त्रिंशदधिक-द्विशतासनेषु सहैव पश्चिमबङ्गाले च प्रथमचरणाय द्विपञ्चाशदधिकैकशतमासनेषु च एप्रिलमासस्य त्रयोविंशति-दिनाङ्के मतदानम् अजायत। पश्चिमबङ्गाले मतगणना सुरक्षायाः दृढ प्रबन्धेषु सप्तसप्तति-मतगणना केन्द्रेषु सम्पत्स्यते। आयोगेन मतगणना केन्द्राणां परितः शान्ति-व्यवस्थायाः सुचारु सञ्चालनाय व्यापक प्रबन्धाः कृताः। अपरत्र असम-राज्ये विधानसभायाः षड्विंशत्यधिकैकशतं आसनानां कृते पञ्चत्रिंशत् जनपदानां चत्वारिंशत् केन्द्रेषु दृढ-सुरक्षा-व्यवस्थायां मतगणना भविष्यति। राज्ये एप्रिलमासस्य नवम-दिनाङ्के प्रायः षडाशीति-प्रतिशतं मतदानम् अभवत्। पुद्दुचेरी-विधानसभा निर्वाचनस्य मत-गणनायै सुरक्षायाः पर्यवेक्षणस्य च सुदृढाः प्रबन्धाः कृताः । पुद्दुचेरी-राज्यस्य मुख्य निर्वाचनाधिकारी पी. जवाहरः आकाशवाण्यै विज्ञापितवान् यत् पुद्दुचेरी-क्षेत्रस्य सर्वेषां त्रिंशत् विधानसभा-आसनानां मतगणना कराइक्काल-यानम- माहे-नगरेषु सम्पत्स्यते। पश्चिमबङ्गालस्य दक्षिण-24-परगना-जनपदस्य फाल्टा-विधानसभा क्षेत्रस्य सर्वेषु पञ्चाशीत्यधिक-द्विशतं मतदान केन्द्रेषु मई-मासस्य एकविंशति-दिनाङ्के पुनर्मतदानं भविष्यति। मतगणना मई-मासस्य चतुर्विंशति-दिनाङ्के सम्पत्स्यते। निर्वाचनायोगेन विज्ञापितं यत् अप्रैल-मासस्य एकोनत्रिंशत्-दिनाङ्के सम्पन्नायां मतदान प्रक्रियायां लोकतान्त्रिक प्रक्रियायाः व्यापक-उल्लङ्घनमालक्ष्य एषः निर्णयः स्वीकृतः। पर्यवेक्षकैः तावत् इलेक्ट्रॉनिक वोटिंग यन्त्रैः सह सङ्केत-भङ्गः, मतदातृभ्यः भय-प्रदर्शनम् तथा मतदान-नियमानाम् उल्लङ्घनम् इत्यादीनां गम्भीर त्रुटिनाम् सूचना प्रदत्ता। बहुषु केन्द्रेषु ई.वी.एम. यन्त्राणां पिङ्गोपरि कृष्ण-पट्टिकाः योजिताः आसन्। अनधिकृत व्यक्तीनां मतदान केन्द्रेषु प्रवेशः तथा च अन्य जनैः मतदान-करणम् इत्यादीनां घटनानाम् अपि पुष्टिः कृता

# राष्ट्रीय-बाल-स्वास्थ्य-कार्यक्रमस्य द्वितीयचरणस्य मार्गदर्शिकाः निर्गताः

स्वास्थ्य एवं
परिवार कल्याण मंत्रालय
MINISTRY OF
HEALTH AND
FAMILY WELFARE
सत्यमेव जयते

स्वास्थ्य-एवं-परिवार-कल्याण-मन्त्रालयेन सद्य एव राष्ट्रीय-बाल-स्वास्थ्य-कार्यक्रमस्य (RBSK) द्वितीयचरणस्य मार्गदर्शिकाः प्रकाशिताः। अस्मिन् चरणे असङ्क्रामक-रोगाः (Non-communicable diseases), मानसिक-स्वास्थ्य-स्थितयः, व्यवहार-सम्बद्धाः चिन्ताः च अन्तर्भूताः, याः आधुनिक-स्वास्थ्य-चुनौत्यः सन्ति।अस्मिन् कार्यक्रमे जन्मतः आरभ्य अष्टादशवर्षवयःपर्यन्तं (१८ वर्ष) बालानां स्वास्थ्ये अवधानं दत्तम् अस्ति। एषा योजना अधिका व्यापिका, जीवनचक्र-आधारित-दृष्टिकोणयुक्ता (Lifecycle-based approach) च वर्तते।स्वास्थ्य-मन्त्रालयेन प्रतिपादितं यत् एतासां मार्गदर्शिकानां प्रकाशनं प्रत्येकं बालकाय सुलभं, समानं, गुणात्मकं च स्वास्थ्य-सेवा-प्रदानं प्रति सर्वकारस्य प्रतिबद्धतां प्रदर्शयति।

# अत्यन्तं पावनं कार्यं संस्कृतस्य संरक्षणम्



भारतीय लोकतान्त्रिक-परम्परायाः संरक्षणार्थं जनगणना २०२७ तमस्य वर्षस्य मार्चमासपर्यन्तं सुसम्पन्ना भवितुमर्हति। एतदर्थं जनगणनाधिकारिणः शीघ्रमेव भवद्भिः सह सम्मिल्य सूचनां संग्रहयिष्यन्ति। तेषामधिकारिणां कोऽपि लाभः भवितुमर्हति वा नार्हति एतत् सर्वमपि विहाय संस्कृतसेवा एव मनसि निधाय कार्यं करणीयं स्यात्।
यदा अधिकारिणः भवतां स्वमातृभाषाविषये पृच्छन्ति चेत् तस्मिन् स्थले तु भवन्तः स्वीय राष्ट्रभाषां प्रादेशिकी भाषाञ्च योजयन्तु ततोप्यग्रे पृच्छन्ति यत् भवन्तः इतोऽपि काः-काः भाषाः जानन्ति तदा भवन्तः ज्ञातभाषासु "संस्कृतम्" अवश्यमेव समावेशयन्तु। कदाचित् वयं सर्वे संस्कृतं वक्तुं न पारयामः तथापि अस्माकं प्रार्थनायां, जप-होमादि कर्मसु, विशिष्य भारतीय- परम्परानुगुणं जीवनस्य सम्यग्परिपालनार्थं षोडश संस्काराणां निर्वहणार्थं, पुरुषार्थचतुष्टयादीनां ज्ञानार्जनार्थं, नैतिक शिक्षायाः सान्दर्भिक श्लोकेषु, सर्वेषु धर्मकर्मसु, पूजासु च नित्यमेव औपचारिक अनौपचारिक निरौपचारिकरूपेण च संस्कृतस्यैव प्रयोगः वयं कुर्मः। गतजनगणनानुसारं सम्पूर्णे देशे संस्कृतभाषिणां संख्या केवलं द्विसहस्रमेवमासीत्, अरबीभाषाभाषिणां फारसीभाषाभाषिणाञ्च संख्या तु बहु अधिका आसीत्। एतयोः द्वयोः भाषयोः विकासाय ते आर्थिक साहाय्यमपि प्राप्नुवन्ति। अतः अस्माकं दायित्वं स्यात् संस्कृतभाषायाः सर्वविध विकाससम्पादनम्। यदि संस्कृतभाषा लुप्तभाषा इति घोषिता भवति चेत्तर्हि अस्माकं प्राचीनग्रन्थानां, वेदपुराणेत्यादीनां प्रकाशनमपि नैव भवितुमर्हति। वयं मूलतः विच्छिन्नाः भविष्यामः। अन्ते च पूजा वाद्ययन्त्रेषु (डीजे- सङ्गीत) एव सीमिता भवितुमर्हति।
संस्कृतभाषा तु भारतस्य प्राचीनतमा विश्वपोषिता च भाषा अस्ति। सर्वभाषाणां जननी अस्ति। एतां भाषां जीवितं स्थापयितुं अस्माकं दायित्वं स्यात्। यदि सर्वकारपक्षतः संस्कृतस्य विकासाय विस्ताराय च आर्थिकं साहाय्यं न प्राप्यते चेत्तर्हि वयं संस्कृतस्य संरक्षणं कथं वा कर्तुं पारयामः।
संस्कृतभाषायाः संरक्षणाय, सर्वविध-विकासाय अस्माकम् औदार्यपूर्ण-भावना, दृढ इच्छा-शक्तिः, सामूहिक-प्रयासश्चेत्यादयः सर्वेऽपि महत्त्वपूर्णांशाः संस्कृतभाषां अग्रे सारयितुं शक्नुवन्ति। अतः अस्माभिः संस्कृतशिक्षणेन सह अयमपि लघुप्रयत्नः करणीयः स्यात्।

-डॉ. सन्तोषकुमारकाण्डपालः सहायकाचार्यः
(शिक्षाशास्त्र-विभागः)महर्षिपाणिनिसंस्कृतवैदिक-विश्वविद्यालयः, उज्जयिनी, मध्यप्रदेशः



## "विनोदकणिका"

{१} वैद्यः दीक्षितमहोदयः स्त्रीणाङ्कृते मौखिकम् आहारं सूचितः। केवलं पञ्चपञ्चाशत् (५५) निमेषान् पूर्णदिनं वदन्तु। कस्मैचित् किमपि वक्तुं, कलहं कर्तुम्, उपदेशं दातुं च शक्यते किन्तु शेषसमये शान्तं भवतु, सम्पूर्णतः तुष्णीं तिष्ठन्तु।
विशेष सूचना- यदि कलहस्य इच्छा भवति तर्हि विस्तृतनेत्रेण पश्यतु अथवा पात्राणि क्षिपन्तु। अस्य आहारस्य अनेकलाभाः सन्ति। निश्चयेन कृशाः भविष्यति।
{२} स्वसख्या सह चलचित्रवाण्यां वार्तासमये यदि अतिभर्जितं शाकं, अत्यंतं प्रसन्नतया स्वपतिं परिवेशयती तदा च अद्य अहं "क्रिस्पी व्हेज" कृतवती इति वदन्ती महिला उत्तमा पाकनिपुणा खलु? सत्यं वा?

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

## क्रीडाभञ्जिका क्रीडा

बङ्गीयमूलम् : महीतोष गायेन
अनुवादकः अनन्त मुखार्जी

किं चिन्तयसि माम् ! जलं वातः उतः
हस्तलग्ना रश्मिः?
तस्मै निःस्वोऽहं, यः खलु मां स्वीकृत्य
क्रीडिष्यति।
प्रीतिभानोः उदयाय ममाटनं - हट्टे घट्टे क्षेत्रे,
तस्या हि प्रीतेर्मरणे दाहकोऽप्यहम्।
चातुर्यमखिलं, अवेला वेला वा
कदाचिदेष्यति प्रकाशरश्मिम्,
तदा अप्रेमः भविष्यति सर्वदहा -
नक्षत्रालोके स्यान्मे विचरणमलिनम्।
तदा क्रीडाभञ्जिका शाश्वती क्रीडा वा
समाप्तिमायात्,
अकृतज्ञः देहः प्राप्स्यति दहनम् महामुक्तये;
स्थास्यत्येषा शाश्वतं हरिकीर्तनं समाजेऽशेषे।



## संस्कृतशिक्षकस्य चन्द्रभानस्य सेवानिवृत्तिकार्यक्रमः, संस्कृतशिक्षकैः कृतं सम्मानम्

**हिमसंस्कृतवार्ता।** अप्रैलमासस्य ३० दिनाङ्के चतुर्विंशतिवर्षाणां सुदीर्घान्तराले राजकीय-छात्र-वरिष्ठ-माध्यमिक-पाठशाला-नगरोटा-बगवां (सीबीएसई) इत्यस्य विद्यालयस्य शिक्षकं श्रीचन्द्रभान-शास्त्रिणम् तस्य सेवानिवृत्तेः पावन-अवसरे राजकीय-संस्कृत-शिक्षक-परिषदः कांगड़ा-मण्डलस्य अध्यक्षस्य श्रीदीपकुमार-शास्त्रिणः नेतृत्वे सम्मानितं कृतम्।
अस्मिन् अवसरे परिषदः सलाहकारः योगेश-शास्त्री, नगरोटा-बगवां खण्डस्य अध्यक्षः विशाल-शास्त्री, महासचिवः अमन-शास्त्री तथा सदस्यः रविन्द्र-कुमार-शास्त्री च तस्य गृहं गत्वा शिरोभूषणं (टोपी) स्मृतिचिह्नं च प्रदाय तं सादरं सम्मानितवन्तः।



## होर्मुज-जलडमरूमध्यस्य नियन्त्रणाय ईरान-संसदः नूतनः प्रस्तावः इजरायल-अमरीका-देशयोः उपरि प्रतिबन्धाः

तेहरान। होर्मुज-जलडमरूमध्ये स्वकीय-नियन्त्रणं सुदृढं कर्तुं ईरान-देशस्य सांसदैः एकः नूतनः प्रस्तावः उपस्थापितः। अस्याः योजनायाः अनुसारं, इजरायल-देशस्य पोतानां (जहाजानाम्) अस्मात् महत्त्वपूर्ण-समुद्री-मार्गात् गमने स्थायीरूपेण प्रतिबन्धः विधास्यते, अपरत्र अमरीकी-पोतानां कृते अनुमतिः तदैव दीयते यदा ते युद्धकाले जातस्य सर्वस्य क्षतेः क्षतिपूर्तिं करिष्यन्ति।ईरान-संसदः प्रथम-उपाध्यक्षः अली निकजादः १२-सूत्रीय-प्रारूप-योजनायाः विवरणं दत्त्वा अवदत् यत्, अयं नूतनः नियमः इजरायली-पोतान् 'कदापि' जलडमरूमध्यात् गन्तुं रोत्स्यति। तेन प्रोक्तं यत् ईरान-देशेन 'शत्रुदेश' रूपेण वर्णितानां राष्ट्राणां पोतान् तदैव गन्तुं अनुमतिः दीयते यदा ते युद्ध-क्षत्यै मुआवजा (क्षतिपूर्ति-धनं) दास्यन्ति। उपाध्यक्षः इजरायल-अतिरिक्तं अन्येषां देशानां नाम न गृहीतवान्, किन्तु ईरानी-अधिकारिणः प्रायः अमरीका-देशाय तस्य क्षेत्रीय-सहयोगिभ्यः च (विशेषतः खाड़ी-देशेभ्यः) ईदृशीम् एव भाषां प्रयुञ्जते।ईरान-देशेन सह अमरीका-इजरायल-देशयोः युद्धस्य मासद्वयं व्यतीतम्, एषः समुद्री-मार्गः च, यः कुल-वैश्विक-तैल-प्रवाहस्य प्रायः २० प्रतिशतं भागं वहति, सम्प्रति बन्दः अस्ति। अनेन कारणेन कच्चा-तैलस्य (Crude Oil) आपूर्तिः अवरुद्धा 'टोल-आधारित-प्रणाली' (शुल्क-प्रणाली) आरभितुं सज्जः अस्ति, यस्य अन्तर्गतं पोतैः जलडमरूमध्ये प्रवेशात् पूर्वं ईरान-सर्वकारात् अनुमतिः स्वीकरणीया भविष्यति। निकजाद-महोदयानुसारं, एषा नीतिः अन्तर्राष्ट्रिय-कानून-अनुरूपं भविष्यति, किन्तु तेन स्पष्टीकृतं यत् ईरान-देशः जलडमरूमध्यस्य स्थितिं युद्ध-पूर्व-व्यवस्थासु पुनः न नेष्यति।उपाध्यक्षः अवदत्, "वयं होर्मुज-जलडमरूमध्ये स्वकीयान् अधिकारान् न त्यक्ष्यामः, पोतानां गमनागमनं च पूर्ववत् न भविष्यति।" तेन अस्य नियन्त्रणस्य तुलना १९५१ तमे वर्षे तैल-उद्योगस्य राष्ट्रीयकरणस्य ऐतिहासिक-महत्त्वेन सह कृता।

# स्वतन्त्रपत्रकारितासमीक्षा(दिवसविशेषः)

आधुनिकयुगे पत्रकारिता समाजस्य जीवनधारा इव अभवत्। यत्र यत्र समाजे, राष्ट्रे, विश्वे वा घटनाः भवन्ति, तासां यथार्थसूचनां जनसामान्यपर्यन्तं प्रेषयितुं पत्रकारिता महत्त्वपूर्णं कार्यं करोति। लोकतन्त्रव्यवस्थायां पत्रकारिता "चतुर्थस्तम्भः" इति नाम्ना प्रसिद्धा अस्ति। विधानपालिका, कार्यपालिका, न्यायपालिका च यथा राष्ट्रस्य शासनव्यवस्थां धारयन्ति, तथैव पत्रकारिता जनतायाः स्वररूपेण कार्यं करोति।

स्वतन्त्रपत्रकारिता तादृशी पत्रकारिता अस्ति या निष्पक्षतया, निर्भयतया, सत्यनिष्ठया च कार्यं करोति। यदा पत्रकाराः राजनैतिककारणात्, आर्थिकप्रभावात्, भयात् वा मुक्ताः भवन्ति, तदा ते समाजस्य समक्षे सत्यं स्थापयितुं शक्नुवन्ति। यदि पत्रकारिता स्वतन्त्रताविहीना भवेत्, तर्हि लोकतन्त्रस्य आधारः दुर्बलः भविष्यति। अतः स्वतन्त्रपत्रकारिता केवलं पत्रकाराणां अधिकारः न, अपितु सम्पूर्णसमाजस्य आवश्यकता अस्ति। स्वतन्त्रपत्रकारिता नाम सा पत्रकारिता या कस्यचित् शासनस्य, दलस्य, उद्योगसमूहस्य वा प्रभावे न कार्यं करोति। पत्रकाराः निष्पक्षतया सत्यस्य प्रकाशनं कुर्वन्ति तथा समाजस्य हितं चिन्तयन्ति।पत्रकारस्य धर्मः अस्ति—सत्यस्य अन्वेषणम्,यथार्थसमाचारप्रकाशनम्, जनजागरणम्, भ्रष्टाचारस्य उद्घाटनम् पीडितपक्षस्य स्वरं भवितुम्।

यदि पत्रकारिता स्वतन्त्रता विना भवेत्, तर्हि समाचाराः पक्षपातपूर्णाः भविष्यन्ति। प्राचीनभारते अपि सूचनाप्रेषणस्य व्यवस्था आसीत्। राजदूताः, घोषकाः, सभाः, मन्दिराणि च सूचनाप्रसारणस्य माध्यमानि आसन्। आधुनिकपत्रकारितायाः प्रारम्भः मुद्रणकलायाः विकासेन अभवत्। यूरोपदेशेषु समाचारपत्राणि जनमतनिर्माणस्य साधनानि अभवन्।

भारते ब्रिटिशशासनकाले पत्रकारिता जनजागरणस्य माध्यमम् अभवत्। लोकमान्यतिलकः "केसरी" पत्रस्य माध्यमेन राष्ट्रभक्तेः प्रचारं कृतवान्। महात्मा गांधी "हरिजन", "यंग इण्डिया" इत्यादीनां पत्राणां माध्यमेन स्वाधीनतासंग्रामस्य प्रचारं कृतवान्। भारतीयपत्रकारिता स्वाधीनतायाः प्राप्तौ महत्त्वपूर्णां भूमिकां निर्वहति स्म। लोकतन्त्रे जनमतस्य महत्त्वं सर्वोपरि अस्ति। जनमतनिर्माणे पत्रकारितायाः प्रमुखा भूमिका अस्ति।

१. जनजागरणम्-पत्रकारिता जनान् सामाजिक, राजनैतिक, आर्थिकविषयेषु जागरूकान् करोति।
२. शासनस्य समीक्षाः-पत्रकाराः शासनस्य नीतयः, योजनाः, कार्याणि च परीक्षन्ते।
३. भ्रष्टाचारनिवारणम्-पत्रकारिता भ्रष्टाचारस्य रहस्यानि उद्घाटयति।
४. जनतायाः अधिकाररक्षणम्-यदि शासनेन जनतायाः अधिकाराणां हरणं क्रियते तदा पत्रकारिता तेषां विरोधं करोति।
५.सामाजिकसुधारः-समाजे विद्यमानाः दोषाः पत्रकारितया प्रकाश्यन्ते।

## स्वतन्त्रपत्रकारितायाः विशेषताः

सत्यनिष्ठा-पत्रकारस्य प्रमुखगुणः सत्यता अस्ति। निष्पक्षता-पत्रकारेण पक्षपातं विना समाचाराः प्रकाशनीयाः। निर्भयता-पत्रकारः सत्यस्य समर्थनार्थं निर्भयः भवेत्। उत्तरदायित्वम्-पत्रकारिता समाजस्य प्रति उत्तरदायिनी अस्ति। नैतिकता-पत्रकारेण नैतिकमूल्यानि पालनीयानि।

## पत्रकारस्य कर्तव्यम्

पत्रकारः समाजस्य सेवकः अस्ति। तस्य कार्यं केवलं समाचारसंग्रहणं न, अपितु समाजस्य मार्गदर्शनम् अपि अस्ति। पत्रकारस्य कर्तव्याणि—सत्यस्य अन्वेषणम्, समाजहितस्य चिन्तनम्,निष्पक्षतया समाचारप्रकाशनम्,अन्यायस्य विरोधः, लोकतन्त्रस्य संरक्षणम्।

## स्वतन्त्रपत्रकारितायाः लाभाः

१. लोकतन्त्रस्य सुदृढीकरणम्-स्वतन्त्रपत्रकारिता लोकतन्त्रस्य आधारः अस्ति।
२. पारदर्शिता-शासनस्य कार्येषु पारदर्शिता वर्धते।
३. सामाजिकजागरूकता-जनाः स्वाधिकारान् ज्ञातुं शक्नुवन्ति।
४. न्यायस्य स्थापना-पत्रकारिता अन्यायस्य विरोधं करोति।
५. राष्ट्रविकासः-जागरूकसमाजः एव राष्ट्रस्य विकासं कर्तुं शक्नोति।

## स्वतन्त्रपत्रकारितायां समस्याः

अद्य स्वतंत्रपत्रकारिता अनेकाभिः समस्याभिः पीडिता अस्ति। राजनैतिकप्रभावः-शासनानि पत्रकारान् नियन्त्रयितुं प्रयतन्ते। **आर्थिकप्रभावः**-विज्ञापनदातृणां प्रभावः पत्रकारितायां दृश्यते।हिंसा-अनेकपत्रकाराः सत्यस्य कारणेन हन्यन्ते। मिथ्यासमाचाराः-सामाजिकमाध्यमेषु असत्यसूचनानां प्रसारः वर्धते। **अभिव्यक्तिस्वातन्त्र्यस्य संकटः**-कतिपयेषु राष्ट्रेषु पत्रकाराणां स्वतन्त्रता सीमिता अस्ति।

सामाजिकमाध्यमानि तथा पत्रकारिता

अद्य डिजिटलपत्रकारिता लोकप्रियता प्राप्तवती। फेसबुक्, ट्विटर, यूट्यूब, इन्स्टाग्राम इत्यादीनि माध्यमानि शीघ्रसूचनां जनसामान्याय प्रेषयन्ति। एतेषां लाभाः शीघ्रसमाचारप्रसारणम्सामान्यजनस्य अभिव्यक्तिः, वैश्विकसम्पर्कः इत्यादयःसन्ति। दोषाः—मिथ्यासमाचारप्रसारः,समाजे भ्रमस्य निर्माणम् इत्यादयः सन्ति। अतः सामाजिकमाध्यमेषु उत्तरदायित्वपूर्णा पत्रकारिता आवश्यकाऽस्ति। भारते स्वतन्त्रपत्रकारितासन्दर्भे भारतीयसंविधानस्य अनुच्छेदः १९ अभिव्यक्तिस्वतन्त्रतायै अनुमतिं ददाति। पत्रकारितायाः स्वतन्त्रता अपि तस्य अन्तर्गताऽस्ति। भारतीयपत्रकारिता स्वाधीनतासंग्रामे महान् योगदानं दत्तवती। अद्यापि भारतीयपत्रकारिता—लोकतन्त्रस्य रक्षणं करोति।भ्रष्टाचारस्य उद्घाटनं करोति।जनहितस्य समर्थनं करोति। किन्तु भारतीयपत्रकाराः अपि अनेकाभिः समस्याभिः पीड्यन्ते।

## पत्रकाराणां सुरक्षा

पत्रकाराणां सुरक्षा अत्यावश्यकी अस्ति। यदि पत्रकाराः भयभीताः भविष्यन्ति, तर्हि सत्यस्य उद्घाटनं न भविष्यति। सर्वकारैः पत्रकाररक्षणनियमाः निर्मातव्याः। अपि च तैः पत्रकाराणां अधिकाराः संरक्षितव्याः। पत्रकारितायाः मूलम् नैतिकता अस्ति। पत्रकारेण—असत्यं न प्रकाशितव्यम्,पक्षपातः न करणीयः,समाजहितं चिन्तनीयम्, मानवीयमूल्यानि रक्षितव्यानि। यदि पत्रकारिता केवलं लाभार्जनस्य साधनं भवेत्, तर्हि समाजस्य हानिः भविष्यति। युवानां भूमिका पत्रकारितायां आवश्यकी अस्ति। ते—सत्यस्य समर्थनं कुर्युः,मिथ्यासमाचारात् सावधानाः भवेयुः,सामाजिकमाध्यमानां सदुपयोगं कुर्युः,लोकतन्त्रस्य मूल्यानि रक्षेयुः। अभिव्यक्तिस्वातन्त्र्यं मानवाधिकारस्य मूलाधारः अस्ति। पत्रकारिता तस्य संरक्षणं करोति। यत्र स्वतन्त्रपत्रकारिता अस्ति, तत्र जनतायाः अधिकाराः सुरक्षिताः भवन्ति। शासनं उत्तरदायी भवति।समाजे




न्यायः वर्धते। अत्र वयं वक्तुं शक्नुमो यत् स्वतन्त्रपत्रकारिता लोकतन्त्रस्य आत्मा अस्ति। पत्रकाराः समाजस्य दर्पणानि सन्ति। ते सत्यस्य अन्वेषणार्थं अनेकाः सोढुं सिद्धाः भवन्ति। यदि पत्रकारिता स्वतन्त्रताविहीना भवेत्, तर्हि समाजे सर्वत्र अन्धकारः भविष्यति। अतः प्रत्येकं नागरिकस्य इदं कर्तव्यं यत् सः स्वतन्त्रपत्रकारितायाः समर्थनं कुर्यात्। समाजे सत्यस्य, न्यायस्य, लोकतन्त्रस्य च रक्षणार्थं स्वतन्त्रपत्रकारिता अनिवार्या अस्ति।

अन्ते वक्तुं शक्यते—

"स्वतन्त्रपत्रकारिता समाजस्य नेत्रम् अस्ति।"

प्रतिवर्षं मईमासस्य तृतीये दिनांके अन्ताराष्ट्रियस्वतन्त्रपत्रकारिता दिवसस्य आयोजनं भवति। वयम् एतस्मिन् अवसरे सर्वेभ्यः पत्रकारेभ्यः प्रणामाजलिं समर्पयामः।

**डॉ विमलेश झा,डीएवी पब्लिक स्कूल, बरारी, भागलपुर,बिहार**